# 2021

## SANSKRIT — GENERAL

**Paper : GE/CC-3**

**Full Marks : 65**

*The figures in the margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

**Section – A**

**Unit – I**

**(Marks : 25)**

1. (a) अधोलिखितयो***रेकस्य*** मातृभाषया अनुवादः कर्तव्यः। 5×1

(i) कृष्णसारे ददच्चक्षुस्त्वयि चाधिज्यकार्मुके।
मृगानुसारिणं साक्षात् पश्यामीव पिनाकिनम्।।

(ii) विचिन्तयन्ती यमनन्यमानसा
तपोधनं वेतसि न मामुपस्थितम्।
स्मरिष्यति त्वां न स बोधितोऽपि सन्
कथां प्रमत्तः प्रथमं कृतामिव।।

(b) अधोलिखितेषु ***द्वयोः*** टीका संस्कृतभाषया देवनागरीलिपिमाश्रित्य लेखनीया। 5×2

नान्दी, कुलपतिः, गौतमी, प्रियंवदा।

(c) प्रसङ्गनिर्देशपुर्वकं ***कस्यैकस्य*** संस्कृतभाषया देवनागरीलिपिमाश्रित्य व्याख्या कार्या। 6×1

(i) सरसिजमनुविद्धं शैवलेनापि रम्यम्
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम्।।

(ii) अर्थो हि कन्या परकीय एव
तामद्य संप्रेष्य परिग्रहीतुः।
जातो ममायं विशदः प्रकामं
प्रत्यर्पितन्यास इवान्तरात्मा।।

(d) (i) विग्रहवाक्यमुल्लिख्य ***कस्यैकस्य*** समासनाम लेखनीयम् (संस्कृतभाषया देवनागरीलिप्या च)। 2×1
अधिज्यकार्मुके 1(a) (i) प्रश्ने,
अनन्यमानसा 1(a) (ii) प्रश्ने।

(ii) निम्नलिखितयोः ***कस्यैकस्य*** सन्धिविच्छेदः करणीयः (संस्कृतभाषया देवनागरीलिप्या च)। 1×1
पश्यामीव 1(a) (i) प्रश्ने,
सरसिजमनुविद्धम् 1(c) (i) प्रश्ने।

(iii) निम्नलिखितयोः ***कस्यैकस्य*** व्युत्पत्तिनिर्णयं कुरु (संस्कृतभाषया देवनागरीलिप्या च)। 1×1
प्रमत्तः 1(a) (ii) प्रश्ने,
अनुविद्धम् 1(c) (i) प्रश्ने।

**Section – B**

**Unit – I**

**(Marks : 15)**

**2.** (a) अभिज्ञानशाकुन्तलनाटकस्य कस्मिन् अङ्के धीवरोपाख्यानं समवतारितम्? अनेनोपख्यानेन नाटकीयं किमपि तात्पर्यं साधितं न वेति आलोच्यताम्। 1+9

***अथवा,***

हंसपदिका का आसीत्? कस्मिन्नङ्के सा दृश्यते? तस्याः सङ्गीतस्य कोऽर्थः? अनेनोपाख्यानेन नाटकीयं किमिति तात्पर्य साधितं न वेति आलोच्यताम्? 1+1+2+6

(b) अधोलिखितयो***रेकस्य*** मातृभाषया अनुवादः कर्तव्यः। 5×1

(i) त्वमर्हतां प्राग्रसरः स्मृतोऽसि नः
शकुन्तला मूर्त्तिमती च सत्क्रिया।
समानयंस्तुल्यगुणं वधुवरं
चिरस्य वाच्यं न गतः प्रजापतिः॥

(ii) प्रवर्ततां प्रकृतिहिताय पार्थिवः
सरस्वती श्रुतिमहतां महीयताम्।
ममापि च क्षपयतु नीललोहितः
पुनर्भवं परिगतशक्तिरात्मभुः॥

## Section – C
### Unit – II
### (Marks : 10)

**3.** अधोलिखितेषु विषय***द्वयम***वलम्ब्य टीका संस्कृतभाषया देवनागरीलिप्या च लेखनीया। 5×2

विष्कम्भकः, प्रवेशकः, अङ्कः, भरतवाक्यम्।

## Section – D
### Unit – II
### (Marks : 15)

**4.** अधोलिखितेषु कस्यापि ***द्वयस्य*** टीका लेखनीया। 5×2

भवभूतिः, मुद्राराक्षसः, कालिदासः, प्रियदर्शिका।

**5.** अधोलिखितानां ***पञ्चानां*** प्रश्नानामुत्तरं संस्कृतभाषया देवनागरीलिप्या च लेखनीयम्। 1×5

(a) उत्तररामचरितनाटकस्य रचयिता कः?

(b) नागानन्दनाट्यकृतौ कति अङ्काः?

(c) अभिज्ञानशाकुन्तलनाटकस्य विदूषकः कः?

(d) महाभारतमाश्रित्य भासविरचितस्य कस्यचिदेकस्य नाम लिख्यताम्।

(e) उत्तररामचरिते प्रधानरसः कः?

(f) मृच्छकटिकम् इति दृश्यकाव्ये वसन्तसेनायाः दासी का?

(g) भासनाटकचक्रं कुत्र आविष्कृतम्?

---